# Vyasakritam Shiva Manasa Puja

# વ્યાસકૃતં શિવમાનસપૂજા

## Document Information

Text title : Vyasakritam Shiva Manasa Puja

File name : shivamAnasapUjAvyAsakRRitA.itx

Category : shiva, pUjA, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 24| 90-131 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# વ્યાસકૃતં શિવમાનસપૂજા

કાશ્યાં શામ્ભવચિત્તેઽપિ તદન્યત્ર ન સર્વથા ।
ત્રિષ્વપ્યત્યુત્તમં મન્યે કેવરું શામ્ભવં મનઃ ॥ ૧॥

તત્રાનન્દો યથા તદ્વાનન્દો યત્ર કુત્ર વા ।
કલ્પતે બહુધા પૂજા શામ્ભવેન પ્રતિક્ષણમ્ ॥ ૨॥

પ્રતિક્ષણં વિશિષ્ટેષ્ટક્ષણદા સા મનોરમા ।
સ તન્મનો વિભુતયા જ્ઞાતં તત્ર શિવાલયઃ ॥ ૩॥

પરાર્ધયોજનાયામઃ કલ્પિતો રત્નમણ્ડિતઃ ।
રત્નપ્રાકારસંવીતો રત્નમન્દિરમણ્ડિતઃ ॥ ૪॥

રત્નદ્વારાર્બુદાકીર્ણમેકૈકં તત્ર મન્દિરમ્ ।
તત્રાપિ કલ્પતરવઃ પ્રસૂનસમલઙ્કૃતાઃ ॥ ૫॥

અર્પિતાઃ કોટિશસ્તેન કલ્પિતાઃ શિવમન્દિરે ।
તત્કલ્પતરુમધ્યસ્થરત્નસિંહાસનં વરમ્ ॥ ૬॥

કોટિયોજનવિસ્તીર્ણં કલ્પિતં તાવદાયતમ્ ।
તદગ્રે કલ્પિતા તેન પુષ્પશય્યા મનોહરા ॥ ૭॥

તત્ર સ્થિતમુમાકાન્તં માં ચિન્તયતિ સાદરમ્ ।
નવ્યચિત્રદુકૂલાનાં પુઞ્જૈરાવેષ્ટિતં મુહુઃ ॥ ૮॥

નાનાપરિમલદ્રવ્યરસરાગાનુરઞ્જિતમ્ ।
દિવ્યાભરણપઙ્કીર્ણં ભિત્તિકાઞ્ચિવિરાજિતમ્ ॥ ૯॥

રત્નકર્પૂરનિકરકાન્તિરાજિવિરાજિતમ્ ।
રત્નાઙ્ગદાર્બુદાકીર્ણં તત્કાન્તિનિકરાશ્રિતમ્ ॥ ૧૦॥

રત્નોત્તમપરિક્રાન્તકટિસૂત્રવિરાજિતમ્ ।
દિવ્યરત્નાઙ્ગુલીયાનાં સહસ્રેણ સમન્વિતમ્ ॥ ૧૧॥

અપારતારહારાણાં વિહારૈશ્ચ વિરાજિતમ્ ।
મણિશ્રેષ્ઠસમાકીર્ણં કર્ણાભરણભૂષિતમ્ ॥ ૧૨॥

રત્નરત્નસમાકીર્ણ કોટીરગણરાજિતમ્ ।
નૂપુરૈરપ્યપારૈશ્ચ સદારપરિવેષ્ટિતમ્ ॥ ૧૩॥

ધૂપૈર્વિચિત્રૈરગરુપ્રભવૈરપિ ધૂપિતમ્ ।
રત્નનીરાજનવ્રાજવિરાજિતમુમાપતિમ્ ॥ ૧૪॥

દિવ્યપક્વાન્નગિરિભિઃ શર્કરાપર્વતાન્વિતૈઃ ।
દિવ્યાજ્યવાહિનીયુક્તૈઃ સન્તોષયતિ માં મુહુઃ ॥ ૧૫॥

સૂપશાકગિરિવ્રાતસમેતોદનપર્વતૈઃ ।
મધ્વાજ્યવાહિનીયુક્તૈઃ તોષયત્યનુવાસરમ્ ॥ ૧૬॥

સુધાફલૈરપારૈશ્ચ વિવિધૈર્મધુરોત્તમૈઃ ।
સન્તોષં જનયન્ત્યેવ સુધાધારાભિરાદરાત્ ॥ ૧૭॥

તામ્બૂલપર્વતાનેવ પૂગપર્વતસઙ્કુલાન્ ।
મુક્તાચૂર્ણાન્વિતાન્ દિવ્યાન્ પ્રયચ્છતિ યથેચ્છયા ॥ ૧૮॥

એલાલવઙ્ગગિરયઃ ખદિરા ગિરયોઽપિ મે ।
એવં પ્રતિક્ષણં તેન માનસં મમ પૂજનમ્ ॥ ૧૯॥

કરોતિ પ્રત્યહં ભક્ત્યા નૃત્યત્યગ્રે યથેચ્છયા ।
પઞ્ચામૃતપ્રવાહૈર્મામભિષિચ્ય મનોહરૈઃ ॥ ૨૦॥

એવં પૂજાવિધાનેન કલ્પિતે શામ્ભવેન મે ।
તચ્ચિત્તે યાદૃશં સૌખ્યં તન્ન ક્વાપિ મનોહરમ્ ॥ ૨૧॥

મન્દિરં શાઙ્કરાકારં દૃશ્યતે નન્દિકેશ્વર ।
સમૃદ્ધં સદનં ત્યક્ત્વા ધનધાન્યાદિભિર્નરઃ ॥ ૨૨॥

અન્યત્ર યાતિ કિં લોકે તથા તત્ ત્યજ્યતે કથમ્ ।
ગૌર્યા સહ વિહારાર્થં પુષ્પપ્રામાદકલ્પના ॥ ૨૩॥

ક્રિયતે તેન સતતં ત્તત્યાગે મતિરેવ ન ।
શરીરે યાદૃશી પ્રીતિઃ મદીયે મમ સર્વથા ॥ ૨૪॥

તતોઽપ્યત્રાધિકા પ્રીતિઃ શામ્ભવે વિગ્રહે સદા ।
તેન છત્રાણ્યપારાણિ મણ્ડિતાનિ મનોહરૈઃ ॥ ૨૫॥

કલ્પ્યન્તે મણિભિર્દિવ્યૈઃ મુક્તાજાલોચિતાન્યપિ ।
સુધાકરકરાકારૈઃ અપારૈરપિ ચામરૈઃ ॥ ૨૬॥

ચારુચામીકરાકારદણ્ડમણ્ડલમણ્ડિતૈઃ ।
નિરતઃ શાઙ્કુરો નિત્યં મમ સેવાં કરોત્યતઃ ॥ ૨૭॥

રમ્યં શાઙ્કુરમેવાત્ર શરીરં મમ મન્દિરમ્ ।
કિં કૈલાસેન કાશ્યા વા કિં ગૌર્યા મન્દરેણ વા ॥ ૨૮॥

શરીરં શાઙ્કુરં મન્યે રત્નમણ્ડિતમન્દરમ્ ।
પ્રતિક્ષણં તેન પૂજા તથા વિવિધસાધનૈઃ ॥ ૨૯॥

ક્રિયતે તાદૃશી કુત્ર પૂજોપકરણાનિ તે ।
મરન્દરસસઙ્કીર્ણકુસુમાસારકલ્પના ॥ ૩૦॥

ક્રિયતે તેન સાઽન્યેન કલ્પનીયા કથં મમ ।
તાદૃશઃ શઙ્કુરો વીરઃ કલૌ કશ્ચિદ્ભવિષ્યતિ ॥ ૩૧॥

દ્વિત્રાઃ સન્ત્યધુના નન્દિન્ તે તે પૂજ્યા ન સંશયઃ ।
એતાવત્કાલપર્યન્તં ત્વયા પૂજા કૃતા મમ ॥ ૩૨॥

પરન્તુ ન તથા પૂજા કૃતા જ્ઞાતાઽપિ મે ધ્રુવમ્ ।
અધુના ગમ્યતે નન્દિન્ રેવાતીરં મનોહરમ્ ॥ ૩૩॥

તત્રાસ્તિ શામ્ભવઃ કશ્ચિતેન ધ્યાનં કૃતં મમ ।
આસાદ્યં તત્ર વિશ્રમ્ય ગૌર્યા સહ વિશેષતઃ ॥ ૩૪॥

પ્રતિક્ષણમપારાભિઃ પૂજાભિઃ પરિવેષ્ટિતઃ ।
વસામિ પરમાનન્દસાગરઃ કરુણાકરઃ ॥ ૩૫॥

સાયઙ્કાલેઽપિ પૂજાં મે સ કરિષ્યતિ સાદરમ્ ।
મહાનિશિ મહાપૂજાં સ કરિષ્યતિ સાદરમ્ ॥ ૩૬॥

તતઃ પરં પુષ્પશય્યાં કલ્પયિષ્યતિ મે પરામ્ ।
રત્નપ્રાસાદમધ્યસ્થમન્દિરે રત્નસુન્દરે ॥ ૩૭॥

વિહારસાધનં સર્વં કલ્પયિષ્યતિ ભક્તિતઃ ।
રત્નદીપાઃ સુધાધારાઃ ફલસારા મનોહરાઃ ॥ ૩૮॥

પુષ્પસારાઃ કલ્પનીયાઃ મન્દવાતા મનોહરાઃ ।

તતઃ પરં સ વિરતો વિહારનિરતે મયિ ॥ ૩૯॥

નિદ્રામુદ્રાન્વિતઃ સોઽપિ ભવિષ્યતિ કથઞ્ચન ।
ઇદાનીં તુ ત્વયા નન્દિન્ કૈલાસં પ્રતિ સત્વરમ્ ॥ ૪૦॥

ગતસંરક્ષણં કાર્યં કૈલાસદ્વારમન્દિરે । (ગન્તવ્યં રક્ષણં)
પુનરપ્યમૃતા મૃતામૃતા મૃતનામામૃતપાનલોલુપા ॥ ૪૧॥

રસના શિવકીર્તનોત્સુકા શિવગઙ્ગેવ પુનાતિ માનસમ્ ।
શિવસજ્જનસાધુવાદગોષ્ઠી ભુવનાન્તાન્યપિ તારયન્તિ સત્યમ્ ॥ ૪૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વ્યાસકૃતં શિવમાનસપૂજા સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૨૪। ૯૦-૧૩૧ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 24. 90-131 ..

Proofread by Ruma Dewan

---

*Vyasakritam Shiva Manasa Puja*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*